तथा तयोरध्रे नागेन दंतः पार्श्वसंगमात् । स्वस्तिकाकारतः प्रोक्तं तदासनमितीश्वरि अत्यन्त
तयोरूर्ध्वसंस्पर्शाज्जंघयोः । पादयोर्जानुदेशे वै वीरासनं योगपद्दतः तलांतः पार्श्वगं कुर्याद् एकम
न्यं तु वासगं कवोरिधस्तथोर्ध्व दिक्षाननं पद्मासनं स्मृतं प्राणायामस्त्रिधा प्रोक्त उत्तमाधम मध्यतः ला
घवोत्तमस्तत्र उत्तमे चित्तनिर्वृतिः सर्वांगे स्वेदसंहादि रधमे मध्यमे तथा सर्वांगकंपनं प्रोक्तं मात्रा
मात्राकालसंयुतात् तेषूत्तम गुणोद्भूत रत्नांसात्काल योगतः ॥ तस्मात्समभ्यसेत्प्रातः सायंवा नित्य
मेन वै वामेन नासारंध्रेण पूरयेद् धृतात्मना स्मरतं कुम्भस्तम्भ्य दक्षिणेनापसारयेत् एवं कुर्याद्वि
तेपश्चा दृविंशान्मात्रया हरेत् धारयेत्तच्चतुः पश्चाद्रेचयेत्तत्तुरीयतः ॥ ६८ कं पश्चपुलकानंदो

१७३

दरूपेण मनसा परमात्मनः योगो योगस्तु विज्ञेयस्तस्यांगान्यष्टवै क्रमात् । यमोथ नियमः पश्चादास
नं तदनंतरं प्राणायामस्तथा प्रत्याहारस्तदनुधारणं ॥ ध्यानं समाधिरित्युक्तान्यष्टांगानि यथाक्रमं क
थयामि स्वरूपं च ज्ञेये मर्त्यो मत्समो भवेत् ॥ तत्र शत्रवः षडाख्याताः कामक्रोधौ ततस्तथा लोभमोहौ
मानमदौ वर्जिवस्सर्वनाशकाः ५६ आत्मा परोक्षवस्तूह कर्मणस्तु यमो यमः तथैकादशरूपस्था नि
यमः परिकीर्तितः ५७ अहिंसा सत्यमास्तिक्यमार्जवं समता धृतिः क्षमा दया तितिक्षा शौचं संतोषो
गुरुसेवनं ५८ पद्मस्वस्तिकवीरास्यभद्राद्युक्तानि वै क्रमात् आसनानि मनः स्थैर्यकरणे साधिका
नि वै ५९ ऊर्वोरुपरि विन्यस्य हस्ताभ्यां पादयोस्तले वामपार्श्वद्वय स्पर्शात् पद्मासनमीरितं ६०

श्री विरक्तचित्तः स्वदेहं तेनोपायेन संत्यजेत् स्वेच्छोत्क्रान्तिरिति प्रोक्ता योगयुक्तात्मनां प्रिये
परकायप्रवेशं तु वक्ष्ये देवि महाद्भुतं। कलोत्तु ङः शाकं प्रायो मर्त्यैः सर्वैरपीश्वरि ७८ अर्केशान्तः पू
रितं रक्तं प्राणं श्रावयेत्तनुं तथा परिश्रुल्लिंगसंयुक्ता मन्त्रतो वीर्ययोगतः ७९ प्रविशेत्तत्तनुं प्राणं
प्रतिष्ठोक्तविधानतः स्वां तनुं गोपयेत्स्त्रीये स्वतस्तां च तथा व्रजेत् ८० सिद्धस्य लक्षणान्यष्टौ यो
गाभ्यासेन सर्वदा। अष्टैतानि महादेवि येरन्यैर्जायते गुणैः ८१ द्वंद्वहानिः सुखावाप्तिरारोग्यं च
रूपविक्लता जितेन्द्रियत्वमक्रोधः कृपा च जनगोपिता ८२ आसन्नमृत्युचिह्नानि कथयामि शृ
णु प्रिये। ये साध्यसाधकौ ज्ञात्वा देहत्यागमतन्द्रितौ ८३ देवतास्वात्मनजन परौस्या तांत तत्स्तुतौ

वैमल्यस्थैर्यलाघवाः॥ तद्दत्कांतिप्रकाशौच योगसिद्धस्य लक्षणं ॥ मूलाधारे मनः कृत्वा वायुमा
कृष्य मूलतः नाडीचक्रांतरं नीत्वा सर्वान्नाडीन्विचारयेत् ७० एवं संसाधिते वायावष्ट त्रिंशत्सु मर्म
सु॥ धारयन्धारयेद्दिव्यां चरीनांगानि सर्वतः ७१ तथा चक्षुरगतं कृत्वा मनः पवनसंयुतं रसांबु
दाह व्याप्तश्च सह सैर्व्यापयेत्तनुं ७२ एवं तैरक्षरै देहं वायुनातन्मयीकृते॥ त्रिकालज्ञो विशु
द्धात्मा सुखी जीवेच्चिरं भुवि। स्वेच्छाचारी व्योमगश्च भजेद्देवैश्च संगमं। स्वेच्छया देहमध्यस्थः क्रीड
नग्रहगतो यथा। एवं संसिद्धयोगस्तु स्वच्छया देहमात्मनः॥ प्राणानाकृष्य मध्यस्थ सुषुम्नारं
ध्रतस्तथा ब्रह्मरंध्राद्विनिर्गत्य न्यस्यात्सर्वात्मना स्ववान्॥ अथ वोत्तरसंयोक्त चूर्णस्यादनतो व

ग्नानिजलेयदा तस्मिन्पक्षिप्रयात्येव यमं संत्यक्तजीवितः तारकप्रतिमां पश्यन् ध्रुवं याति यमालयं
भास्करं नगरीः पश्यन्नपि याति यमालयं जलादिषु तनुच्छायां विकृतां वीक्ष्य मासतः प्रयाति निधनं
छिद्रं पश्यन्स्नानेऽश्वमंडले स्नानानुलिप्तगात्रस्य पूर्वं शुष्यति वै उरः। सपक्षाद्याति निधनं सर्वैरपि
सुरक्षितः गुरुं मातृगणान्विप्रं श्वंडस्यैर्विदेवताः। आस्तिकान्सततं निंदन्नकारणतएव स्वार्थ
वैरस्य दलनेवरिस्तागेस्वरोषतः। गुरुमंत्रद्विजत्यागे पविराज्ञायतेमृतिः गुरुं विद्यां च जनकं जननीं
सर्वदेवताः सदाधिक्षेपरूपापान्सांत्वकुर्वन्नाशुनरपति पुस्तकं निजगेहे वा विष्टरं शयनं तु वा निः
कारणं निरस्य कुर्वन्नाशुलनरपति मानवः। हृद्देहवक्त्रवाणीनां वैवर्ण्यैर्मासतो मृतिः। आनेस्वदेव वै

सुगतिं प्राप्य सिद्धैस्तु नवतो जातमात्रतः अकारणं निजांश्वं विमुच्य प्रकृतिं नरः समाश्रयेत्तत
स्त्वशु म्हतिस्तस्य सुनिश्चिता अरुंधतिं ध्रुवं सोम्य नेक्षते चेत्तदर्ईतः ॥ हशोर्नसांतिकाकांसाचं
डके पांगयोर्न चेत्तं विलोकयति तस्यार्द्धं मृतिमेतिसुनिश्चितं । गुल्फाधः स्फुरणं नाज्ञा पादयोश्चेत्तं न
जायते ॥ तस्याशु नाशो गदितो ज्ञानोसंडेवपरपतः निरुद्ध कर्णरंध्रस्य न चेत्कुंडलिनी ध्वनिः श्रूयो
वा हृदयपते मूर्द्धि गृहक्षेत्रादितोपिवा मूर्द्धि वा विद्युज्जीनास्तं परासुं नकावदेत् ॥ पश्चात्कृत्वा कर्णे गंडू
षेन परपेक्ष्य रुकरुचापकं । सद्यः परासुमात्मानं जानीयात्सर्वथा नरः । ८९ मस्तकस्य करः परप
न्दकोष्ठं स्थूलमात्मनः अंगुल्योरंतराहम्यां परपेद्यस्तो विनश्यतः ९० स्रेष्मशुक्रमलानिस्तु निम

र्दधिक्षीरजलात्मभिः सिंधुभिः सप्तभिः द्वीपैस्तत्संख्यैर्द्विगुणोत्तरैः ८ आवृता राक्षसलिलै जल
धेर्वाह्यपार्श्वयोः मध्यविस्तारमानात्तु वहिरष्टगुणस्तु सः ९ स्कालचक्रं परा शक्ति मारुतेनसदैवतु
तुल्यं परिभ्रमत्येव पश्चिमाभीपसमतः १० तस्मिंस्तानवीथीनिर्वृत महनिरस्कृतैः तेजोमयैर्द्वाद
शारैर्युक्तं मेषादिभिर्गृहैः ११ तेषु वीथीषु द्वादशा सुखाः सप्तग्रहाः स्थिताः राशिचक्रेण कालेन
स्वीचक्रेण परितस्तथा १२ प्रयांति तेषां चारेण लोकानां जवतिस्थितिः मध्यस्थमेरोर्ज्वलिता सदे
वास्ते महाद्युतिः १३ तस्मान्निर्तीजलास्वंताः शेषाः स्थाः सुधश्चतुर्दश । तद्वदिः परमेष्ठो मन्यंता वि
चालुसंस्थिता । १४ कृतादिवर्षादास्य प्रतिवर्षमितिस्थिताः द्वितीयादिषु वर्षेषु क्रमात्ताः परिवर्त्त

रुध्ये नासतो निधनं भवेत् १०० कालतत्व. १०१ इति सप्तविंशः पटलः २७ अथ षोडशनित्यानां लो

कात्मत्वं वदामि ते यन्मयं विश्वमखिलं वर्त्तते सचराचरं १ कालमातृकयोर्व्याप्तिः प्रागेवोक्ता मयात

व वाच्यवाचकयोगेन मातृकालोकयोरपि २ व्याप्तिमद्य प्रवक्ष्यामि सम्यक्के काललोकयोः यदायत्त

मिदं विश्वं नित्यास्तत्कालविग्रहाः ३ कालस्य षोडशाकारो रूपं दर्शप्रतिपद्वृद्धि ह्रासक्रियात्मा चेन्द्रस्य आ

द्यर्धकलया तथा ४ लोकरूपं तत्प्रमाणं कालचक्रं च तादृशं तयोरन्योन्यनित्यत्वव्याप्तिं तद्वत्स्थि

तिं तयोः ५ नित्यालोकस्थिं मानं तासां कथं च विग्रहं ब्रह्माणं मातृकां रूपं श्रीकण्ठोक्तक्रमेण वै हे

मरूपो भुवो मध्ये मेरुस्तिष्ठति पर्वतः तस्मान्नितो महीपार्श्वे पंचाशत्तयोजना लवणोदस्तुरास

स्थानं यजेत्स्वाङ्गजन्मवासरके तु तां। देशाधीशां तु तन्मासपूर्णायां पूजयेच्छिवे। प्रत्यब्दमेवं कुर्वाणं
न स्पृशंति रमा यशः कदाचिदपि दीर्घायुररोगी ज्ञानवान्सुखी। राजभिर्मनुजैः स्त्रीभिः रत्नैः प्राणिर
प्यसौ मान्यते सर्वमंत्राश्च सिद्धाः स्युस्तत्पूजनात्। जंबुप्लक्षः शाल्मलीच। कुशक्रौंचौ यथाक्रमं शाक
श्च पुष्करश्चेति सप्तद्वीपेषु रूढः तेषां नामनित्येव स्युस्तत्तन्नामानितन्मुखात् तत्तन्नामनित्यस्य तद्दी
पे तत्र पूजयेत्। तां तां नित्यां तत्तत्तत्काले काले तु साधकः। एवं पूजयितुर्लोके न समोस्ति न चाधिकः ३०
३० मध्येन्दुनित्तामनितः कालचक्रां ततो बहिः महाव्योमध्वनिः सीमंत। तैत्तद्वयसंस्थितिः ३१ स्युः स्थिराया
तुर्वो मध्ये चक्रस्पन्त्रमतो निशां। ग्रहाणामत्र संचारः प्रचार नियतात्मनां ३२ कारणं परमेशानि त

नं एवं युगेषु चान्येषु वर्तते षोडशस्वतः कालेषु पश्चिमध्यादि पूर्वमोमांतमीश्वरि। परिवर्तिनं जं तेता
मध्यस्याश्चांशातश्चरेत्। अन्याः सर्वास्तत्र तत्र वरंति स्वयमेव वै॥ तथा कालक्रमात्तासु नजं तेष
रिवर्त्तनं कालतो देशतश्चका दैक्यं संजायते यदा तदा नवं तिच्छपाला धार्मिकाः कालवर्षतः प्रजा
श्च सुखिनोन्त्यु रुरोगाः कालमूर्त्तयः २० कालचक्रस्य चाद्यस्य वीथ्यां तिष्ठंति तारकाः तद्वद्दिपरमे
शीम्निः स्थितिस्तत्र तदंतिको २१ तासामपि वनित्यानां षोडशानां च तत्क्रमात्। एवं देशं च कालं च तन्म
यं समुदीरितं २२ देशाच्च षति थिनां च संपाताद् ऐक्यमागतां॥ पूजयेत्तु विशेषेण तां पूजयेच्चाखिलास्तये २३
तेषु विद्योपदेशानु तास्यास्तत्सांनिध्यं निर्वित महाशक्तिश्च जायेत तत्रयाणाम् ऐक्यवैभवात् २४ कालश्चा

तंत्रराज:
१७९
178

लितापातुसर्वांगं कामेशीपुरतःपातु भगमालात्वनंतरां दिशंपातुतथादक्षपार्श्वेमेपातु
सर्वदा नित्यक्लिन्नाथभेरुंडा दिशंपातुसदामम तथैवपश्चिमंनागं रक्षेत्सावह्निवासिनी
महावज्रेश्वरीरक्षे दनंतरदिशंसदा ५९ वामपार्श्वंसदापातु दूतीमेत्वरितातत: पालये
त्तुदिशंवान्यां रक्षेन्मांकुलसुंदरी ६० नित्यामामूर्द्ध्वतंपातु साधोमेपातुसर्वदा। नित्यानीलप
ताकाख्या विजयासर्वतश्चमां ६१ करोतुमेमंगलानि सर्वदासर्वमंगला देहेंद्रियमनःप्राण
न् ज्वालामालिनिविग्रहा ६२ पालयेदनिशंचित्रा चित्तंमेपातुसर्वदा कामात्क्रोधात्तथालोभा
न् मोहान्मानान्मदादपि ६३ पापान्मांसर्वतः शोकात् संशयात्सर्वतःसदा रक्षेन्नित्याक्षस

१७९

लोकनसंलासंस्पर्शादिरहितांरूणां पापकर्मक्षयात्मेन रक्षिताः सुरक्षतस्समाः कालचक्रस्यनिसाया
लोकस्यबहिःस्थितं व्योमरूपमनाद्यंतं यत्रचिन्मयभावयोः ५० योवेत्स्येवमशेषं तु नित्यावेनवमी
रितं। सजीवन्मुक्त एवेति प्रोक्तंतल्लक्षणंचते ५१ समस्तापद्विमुक्त्यर्थं सर्वसंपद्वाप्तये भूतवेतालपि
शाचादि पीडाशांत्यैसुखाप्तये। ५२ समस्तरोगनाशाय समरेविजयायच। चौरसिंहद्वीपगज गव
लादिभयानके। ५३ अरण्येशैलगहने मार्गेडिंडिके तथा सलिलाग्निमरुत्पीडा स्वव्योपोतादिसं
कटे ५४ भजन्नित्याकवचं सक्त्वसर्वतरस्यसौ सुखीजीवतिनंदी निःसपत्नोजितेंद्रियः ५५ श्रु
एतत्कवचंदेवि वश्येत्नवतवात्मकं येनाहमपिशुद्धेषु देवासुरजयीसदा ५६ सर्वतः सर्वदस्मान्नेत्

वां स्वसमानाभिरन्वितां नित्याभिः सेवितां तथा। ध्यात्वा तां पूजयित्वा तत्समाकारतां ज्ञानैः
लब्धिनोदस्तत्समीप निवासी स्यात्सुनिश्चितं। कोटियोजनविस्तीर्णं समायामं महाद्भुतं नवरत्न
मयद्वीपं तन्मानाब्धिनिरावृतं। तत्रत्यां समानस्य सहस्रादित्यतेजसः रत्नद्वीपस्य मध्यस्य तत्री
यांशे तु मंडपे कोट्यादित्यविभिर्भांते ध्वनितो संख्यशक्तिभिः तथा समन्वितां भाय न्तरीनवतिमस्त
मः एवं ध्यात्वार्चयेद्देवीं नित्यां परमयो श्रद्धया नरो निरस्तसंसार दुःखा ज्ञानो जितेंद्रियः ७६
निग्रहानुग्रहकलादक्षः सुखी निःसंगविज्ञवान् अपापः शुभशीलश्च सत्वार्जवसमन्वितः ७७
देशिकः स्वकुले स्तुंग सर्वसंभाविताल्मवान् जायते तस्य परितो यो जनं पावनं भवेत ७८ तदा

वेष्ठैवं तु केवलं न त्वन्यदवलंबाय तयोः कुत्रापि विद्यते। [33] तयोर्बहिः परिसीम्नि क्वचिद्द्विचतुष्टयं जा
गुरुस्वरूपां तत्तीरे कोलवक्त्रां तु पंचमीं [34] सलिले कुरुकुल्लां च पीतांबरां भ्रु विस्मितां। तन्मध्ये नवरत्नात्म
महाद्वीपं च तत्रैव २५ कल्पकोद्यानमृतुभिः षड्भिः सेवितविग्रहं। तन्मध्ये संरम्भरूपाभिर्वृतां संगी
तशक्तिभिः २६ गीतवादित्रनृत्यादि संसक्ताभिरनारतं। विनोद्यमानां विलसन्मदमंथरवीक्षणां [37] रत्न
मंडपमध्यस्थ रत्नसिंहासनोपरि। स्मितविस्मितां शक्तिवृंद गीताकर्णनिनंदितां [38] सहजासनसंयोगैः
संजातानंदविग्रहां दयामदारुणापांग विलोकितसुसाधकां २८ परितोन्रूपलोभिश्चित्रैः कर्णचामर
कादिभिः विराजमानान् द्विरदानश्वानपि तथा विक्षन् ४० शक्तिभिर्दर्शितानये पश्यंतीमभितोऽस्म

गुह्यानां मातृका विद्या विश्वं हं विश्वं यतः तेन तेषां तु पूजार्थं वक्ष्यते ह्याद्यमंडलं सूक्ष्मस्वरैर्नवि
दिंदो मंडलं भास्करस्य तु । सुधांशोर्जनरूपं स्यादितरैस्तन्मया यतः तेन तेषां मंडलानि तैस्तै
र्वर्णैर्वदामि ते तेषां नवानां पूजासु तन्मयेन च मंडलं ७४ चंद्रार्कयोः पृथक् पूजा स्वस्वर्णैर्मं
डलं तयोः कर्मलक्ष्मदे देवेशि सर्वश्रेयस्करात्मकं ७५ प्राक्प्रत्यक्दक्षिणोदक् चतुःसूत्रनि
पातनात् त्रिदशत्रिमात्रिजनये नवकोष्ठानि तेषु वै ७६ मध्ये प्राक्कोष्ठयोर्वृत्ता वृत्तत्रयमतिस्फु
टं । तन्मध्ये तिर्यगूर्ध्वं सूत्रद्वयनिपातनात् ॥ ७७ विधाय नवधा मध्यमीशादि विलिखेत्क्रमात्
तां ह्याद्यस्वरान्मध्ये ७८ वेन सा युतं । ७९ वृत्तवीथ्योः स्वरोपेतान्नवस्तां मातृकां लिखेत्

मुद्योगा दस्युनेपुत्तुकर्मसु। अस्मत्पाङ्कुरविंतातो द्विसतञ्जीरतस्तथा रक्षंतुमांसर्वदाता: कु
र्वंत्विञ्जांस्तुनेपुव निसा:षोडशमांपांतु गजारूढा: स्वशक्तिभि: तथाहयसमारूढा: पांतु
मांसर्वत:सदा सिंहारूढास्तथापांतु व्याघ्रारूढा रथारूढाश्चमांपातु सर्वत:सर्वदारुणे।ता
र्क्ष्यारूढाश्चमांपांतु तथाव्योमगतास्तथा।भूतगा:सर्वगा:पातु मांसर्वत्रचसर्वदा भूतप्रेतपि
शाचास्मारकृत्यादिकान्गदान् द्रावयंतुस्वशक्तीनां भूषणैरायुधैर्मम इत्थ गजारूढापि
पेचास्स तार्क्ष्यारूढाखिलायुधा: असंख्या:शक्तयोदेव्या: पातुमांसर्वत:सदा ७० सायंप्रात
र्जपेन्नित्या कवचंसर्वरक्षकं। कदाचिन्नाशुनंपश्येत् न कष्टं लभतेतिवमत्सम: ७१ [illegible]

तंत्रराज: १८१

181

ऽक्षराणि वर्तुर्थेता न्यर्चयेत्तेष्वतानिति । नौ मं बुधं तथा सौरिं गुरुं राहुं च शुक्रकं केतुमेतेस्तु सर्व
त्र मंत्रास्तु लोकेच पूजनं । एवं नव ग्रहाणां तु मंडलान्युदितानि वै तेष्वेव तेषामर्चा तस्ते कुर्युस्तदनुग्रहं
भास्करे हीस्कलतद्वार द्वयेदर्शेविदूर्लिके स्वोच्चयोः स्थितयोः पूजा मंडलं स्मृतं पार्वति ए०विलिख्य
वृत्तयुगलं तन्मध्ये तिर्यगुर्ध्वतः रेखास्तिरष्ट तिर्मध्ये त्वेकाशीति पदेति लिखेत् ए १ ईशाकोष्ठादिप
रितः प्रवेशेनामृतार्णवान् । मायांताशीतिसंख्यातान् मध्ये देवगतेवतत ए २ वृत्तयोरंतरा कृत्वा
मातृकां पूर्षितां च तैः पंचत्रिंशा लिखेत्तत्र बिंबेसौ मंसमर्चयेत् । ए ३ कर्पूरस्वंदनाम्भोत दा लिखे
दिंडबिंबकं रक्तचंदनसिंदूर गैरिकै षीकतोरवे । एवं कृत्वा बिंबतंत्रतं च पूजयेत्सौरूपतः

१८१

तत्रार्कमर्चयेत्तस्य नामभिर्हृदिशोदितैः प्रणवाद्यैर्नमोन्तैश्च नानोः सर्वत्रसर्वदा सोमस्याद्यांस्वसंयु
क्तं कृत्वा तेनतथार्चयेत् ८० तन्नाम्नातत्रविलिखेद्धि न्याद्यंवस्वराष्टकं कंपीडत्रास्वरयुतंना
त्तकोणवस्ययोगतः ८१ विलिखे छत्रयोर्मध्ये मध्यकोष्टपितं लिखेत दादवकिस्वसहित मर्चयेत
त्रमंडले ८२ सोमस्तुल्कक्रमेणैव डोल्कालेषुसर्वदा निवेद्यशर्करादुग्धपायसैश्चोपचारकैः सप्तस
नेषुकोष्टेषु कृत्वा रत्नत्रयंतथा। तत्रहृगादि वर्णैश्च स्वरैस्तां मातृकामपि विलिख्य मध्यंच तथाकृत्वा
तेषुवत्क्रमात् स्वस्वहृगांकिताण्णारमा अक्षरैरालिखेदपि। मध्येऽणवगान्तस्थं वर्गाद्यक्षरमालि
खेत् एवंकृतेषु नवसु पूजयेद्ब्रह्मनवग्रहान्॥ अस्मादिशांतमन्त्रितोलिखेत्तामान्मनुक्रमात्

तंत्रराजः
१८२

मंडपादेस्तुलक्षणं १ कुंडानां स्थाननिर्माणे न्तिर्योन्यादिलक्षणं। नामानि तेषां मन्त्रैस्तु आनंजि
क्याल्लक्षणं २ होमद्रव्याणि सामान्यविशेषाणि कृतक्रियां उपक्रमोपसंहारौ फलानि च यथा
क्रमं ३ कथयामि प्रवृत्तये साधकेभ्ये मंत्रीसिद्धिमवाप्नुयात यदि कुर्याद्यथा दृष्टं विपन्नो निरयं व्रजेत
४ नानोर्गस्यादिशो नानोर्गस्यादिशो ज्ञात्वा कुर्यात्कर्माणि देशिकः तत्प्रसादिक्यरिज्ञानं प्रत्के
वक्ष्ये यथाविधि सुसमे भूतले कृत्वा वृत्तं च मण्डलं ततः तन्मध्यविन्दुमध्यंतु शंकुसंस्थापनं तस्य
वै। अग्रच्छायान्वयवशात् कृतेश्वर्वापरद्वये पूर्वापरावुद्वयीकृत्वा चिह्नितं दक्षितस्तथा। समसान्य
परिमाणं कृत्वा वृत्तद्वयं पुनः तयोः संश्लेषसंजात मत्स्यदक्षोत्तरस्थिते। स्वेदि द्वये व साक्ष

282

१८२

।द्विहस्तांतस्तिर्यगूर्ध्वः चत्वारेखाः समांतराः एकोनविंशतन्मध्ये प्रालिखेत्प्राग्वदीरितान् प्राणादि
कान्तजीतांतास्तु स्वैरूपैतान्स्वरैर्युतान् इतयोरंतरातैश्च पंचविंशतिवर्णकैः। स्वरैर्नेत्रेषु तैर्वक्ति
दशार्णैर्अधितां लिपिं॥ विलिख्य विंशदाकारं त्रिहस्तायामविस्तरं तन्मध्येनानुमावाह्य पूजये
त्प्राग्वदीश्वरि पीठे वा सुधयाक्तसेन्दुतले वा शिलातले। कुसुमेनावृते कृत्वा बिंबान्युक्तानि पू।
जयेत्[२८] एवं सर्वत्र तंत्रेस्मिन् ग्रहपूजा समीरिता विशीर्णादेशरहिते तत्तत्क्रमतोर्चयेत १००
एवं ते देवि विख्यायाः कालदेशात्मतोदिता सर्वात्मना सर्वदा च सेवार्थसर्वविग्रहां शोरागतत्व
१०२ इति अष्टाविंशः पटलः। अथ पीठशक्तिन्यासानां होमाय विधिवच्छिवे। सान्ध्यादि दिग्विभागं च

तंत्रराजः
१८२
283

वेमीनेक्रमेणैव अनयात्मसु कुर्वीत योनिकुंडानि मंगले अमंगलेषु कुर्वीत वरेष्वर्द्धशशांक
कं। स्थिरेष्वपि त्रिकोणानि परेषु तु चतुरस्रे पंचास्रं च षडस्रं च सप्तास्रं चाष्टकोणकं एवं नवानां
कुंडानां लक्ष्ममानादिलक्षणं मध्यमांगुलिमध्यस्य पर्वणः परिणाहतः तृतीयांशोन्नवेदत्र तत्त्वैस
र्वत्रांगुलिः २० तैश्चतुर्विंशतिर्वै कुष्टि वितस्तिस्तत्त्रिंशिरगुलौ। अरत्निस्तद्द्वयेन स्याद्धस्तस्तद्द्वयतः
शिवे २१ तद्द्वयं तु नवेद्याम स्वन्मानास्याल्परोन्नतिः॥ ह्रस्वसंगुला सा स्यात्तन्मानैः कुंडकल्पनं
२२ कृत्वा ततः सर्वतः पश्चाद्द्वादशांगुलमानतः। परं वप्रत्रयं तत्रापि विदध्याच्चिह्नयुग्मकं प्राक्पुर
कर्णिकमात्रेण तयोरेखावलंबतः २४ दक्षिणोत्तरतो हंस पदे कृत्वा ततस्तयोः प्रसार्यसूत्रं तत्रा

१८२

स्यक् सूत्रमध्ये तु विन्यसेत् सूत्रे दक्षोत्तरं तेषां मध्ये प्रागादि कल्पयेत्। राज्ञां होमाग्निवेकादिव
योगार्थं तु मंडपं। विदध्यान्नवहस्तेन विस्तारायामसंयुतं १० षोडशस्तंभसंयुक्तं चतुर्द्वारं सुतो
रणं ग्रदेबरवटाश्वत्थ प्लक्षैर्वंदनमालया ११ पिहितां शेषकोणे च तैस्त्रिनागैकनागतः विदध्यान्म
भतीवेदिं करमात्रसमुन्नतां १२ दर्पणोदरसंकाश मध्यां तदग्नितस्तथा। प्रागादिदिक्षुकोणेषु वन्ह्या
दिष्वेव कल्पयेत् १३ कुंडान्यष्टौ चतुष्कं च तेषां रूपं च नामकं निर्मलं सकलं च वक्ष्ये यथाविधि तथा
नघे १४ तुलाकुलीरमेषाणां मकरस्य च देशतः। विदध्याद्वृत्तकुंडानि चरराशिचतुष्टये। वृषे सिंहे
वृश्चिके च कुंभे च स्थिरराशिषु विदध्याच्चतुरस्राणि कुर्यात् कुंडान्यनुक्रमात्। मिथुने कन्यकायां च वा

देवराजः

१८४

णांस्या दारीनांक्रमतः शिवे तस्यैवषष्ठमंशं तु पार्श्वयोस्तु विकाशयेत् उत्सेकं पश्चिमे सूत्रं तन्मा
नेनाथ सूत्रयोः विन्यासाद्बहुलसूत्रांता तद्द्वयाग्राबलंबनात् कुंडं त्रिकोणमुदितं चतुर्षु स्थिरराशिषु
तन्मध्यपंचमांशेन विकास्य बहुलसूत्रकं पूर्वतः पश्चिमं द्वंद्व कोणयोर्मध्यदेशतः २६ तत्कोणमाने
नतथा त्वामये त्पश्चिमायकान् उत्तरायावधि तथा दक्षिणायावधि प्रिये २७ तन्मध्यतिर्यक्सूत्राग्रद
यावच्छंतस्तथा विकासितबहुलसूत्रावधि सूत्रद्वयं नवत् २८ योनिकुंडमिदं स्नदे स्यावतुर्ष्वन्यात्मसु।
राशिषु प्रोक्तकल्याण कर्मसूत्रार्थसिद्धिकृत् २९ योनिकुंडमिदं स्नदे तन्मध्यसप्तमांशेन बहुलसूत्रं

784

१८४

विकास्य तत् मानेन परितोन्नतां कृत्वा वृत्तं तथा ततः ३० तत्कोणमानात् वृत्ते कृत्वाद्वि कोणित

विमार्जयित्वोक्तमानतः २५ ततस्तद्याम्यालेख्य मध्यचिन्हस्यमानतः कुर्याद्धंसपदं कोष्ठान्यनित
स्तेषु पातयेत् २६ चतुष्टयं तु सूत्राणां चतुरस्त्रं नवेत्समं तस्मिन्नन्यानि कुंडानि वदामि तत्रमानतः
२७ तेषां प्रोक्तक्रमेणैव चरादिशु तु राशिषु मानतिर्मालयोर्वक्ष्ये विधानं तु स्फुटं शिवे तन्मध्यात्
दशांशेन प्राक्सूत्रार्धं विकाशयेत् तिर्यक्सूत्राद्द्विस्तेन मानेनात्र नयेत्तथा मध्यचिन्हावलंबेन
नवेत्तत्कुंडकं। चतुरस्त्राणि तीयात्तु त्र्यस्त्रान्तः सान्यतस्तथा ३० जन्यते सर्वकुंडेषु तेन सर्वा
णि सर्वतः। तत्समान्येव जायंते बलवत्संगुलात्मत्मना ३१ तन्मध्य दशमाशं तु परित्यज्याध्वजद्
तः शेषाशांशक मानेन तन्मध्यान्नामयेत्तथा ३२ अर्धचंद्राकृतिर्येन नवेत्कुंडं तदिरितं एतद्यंचरा

मिश्रकुण्डे प्राङ्गे समुद्दिष्टक्रमेणवै हस्तमध्यस्तु वोमानं त्रिगुणंविनजेत्क्रमात् स्ववांछितेनमानेन तद
स्यालिनवंतिहि ५० एवंयंत्रादिष्टस्मेषु षट्त्रिंशेषुविधिर्नवेत कुंडेषुचतथा कोटि होमादिषुस
मीरितं ५२ जोत्केषुन्यतमेकुंडे नवहस्तप्रमाणके कारयेत्कोटिहोमंतु पुरषैरष्टभिस्तथा दिग्विदि

क्स्थैः क्रमात्सेव वासरैः सर्वसिद्ध्यै तेषांचदक्षिणांदद्या स्वजा प्रणतिपूर्वकं गोचर्मद्वयमात्रांतु
भुवंगांजस्तुतस्तनी महिषीमप्यजामश्वंदासदासीविभूषणं वासांसिहेमनिष्काणां शतंतेषांम
ध्येकशः ततोगुरोश्चतान्येवतैः समानमुदीरितं दिव्योत्पातेषु रोगाद्यैर्घोरेस्वरिपुनिग्रहे तथादि

ग्विजयेन्पस्य परकृत्यादिसंभवे कारयेत्कोटिहोमंतु विद्यानिसयाद्यया स्वरूपवेषशीलेश्च

त्रवै पातयेत्संवस्त्राणि तत्पार्श्वे चास्त्रकुंडकं तन्मध्ये षोडशांशेन विकासयुक्तस्त्रकं तेनमाने
न्यवतथा कृत्वाऽवृतमतिस्फुटं तद्वृतेऽवृतमध्यस्य कुर्याद्दिक्षुन्नवांकनं तत्रषट्सूत्रपातेन नवत्र्कुं
डषडस्त्रकं तन्मध्यदशमांशेन विकासयुक्तस्त्रकं तेनमानेनसंत्यांस्य कृत्वाऽवृत्तं तथा ततः तत्र
तुःषष्टिनागेषु त्रयस्त्रिंशांशमानतः वृत्तेविधाय चिह्नानि सप्तसूत्राणि पातयेत् तत्पार्श्वे संज्ञ
वत्कुंडं चापगं वायुदिग्गतं समस्तवैरिनाशाय प्रोक्तं कुंडमिदं शिवे तन्मध्यस्य चतुर्विंश मानेवा
सेपिपूर्ववत्त विधायचतुरस्रं तु पूर्वकोणाद्यमानतः ७७ कोणादन्नितएवास्य कृत्वाचिन्हानिचाष्टवे
तेषुचिन्हेषु कृत्वाष्ट सूत्राणि परितः शिवे ७८ कुर्याद्दशास्त्रकंकुंड मेतेषामेस्वलादिकं प्रवक्ष्या

तंत्रराज
१८६

186

विरादयलाछितरास्रो महाकुंडस्यचैवंतु कुर्यान्मात्रंसमाहतः नान्निंकुर्यात्तुसर्वत्रकुंडमध्येवि
धानतः अष्टच्छदंसरोजंतु विदध्याच्चारुविग्रहं।चतुर्भिरंगुलैःकुर्यात्कर्णिकांदलमेवच विस्तारादपि
चोत्सेधं षड्भिः षड्भिः रुदीरितं ञाग्वन्महतिकुंडेच कुर्याद्देहेनतत्तथा।ध्यानमग्नेश्छिद्रसंज्ञीरतं सो
म्यक्रोधविभागतः सौम्यंनित्यासमाकारं ध्यानमन्यत्कृष्णकेशिये छिद्रोर्ध्वसमदस्तंच त्रिपादंसप्तजि
ह्वकं॥ त्रिधारूपमतिक्रूरैररुणैः षड्भिरीरुणै षड्भिः सप्तै श्चतुर्भिर्हस्तैस्तुशक्त्यग्नी स्रुवस्रुवौ
तथा इतरैस्तोमरंतालहस्तंसर्पिः कुम्भाजतं ७१ नदंतमतिवांयात्तु वक्रध्यायेद्धविर्जगर क्रूरेषु
सर्वहोमेषु ध्यानमेनवमीतं ७२ वाक्भिःशिरसिदेहेवा श्रीत्रैश्चक्षिकिषुवातथा जुजुयाच्चैतदाकि

१८६

निसान्तकैस्तथास्तिकैः ओल्कानां सर्वकुंडानामारत्निः खातमात्रकां कोटिहीनस्य कुंडस्य खात
मर्धं तु तस्यैव सर्वेषां मेखलामानं वितस्त्यष्टम्हकैः विस्तारोत्सेधयोः कुर्याद्योनिं दोर्वासनायतः म
हाकुंडस्य तु पुनर्मेखला हस्तमानतः तिसृणामपि विस्तारः प्रत्येकं षोडशांगुलाः ६० तेषामुत्से
धसंख्या च षोडशासु क्रमेणैव योनिनिर्माणमधुना वासनां च स्फुटं क्रिये ६१ वहिर्मेखलामध्या
दारभ्य निजनालकां वितस्तिमात्रकारभ्य मध्यस्थदलसंनिभा ६२ वितस्त्यायामसंयुक्तां तद
र्धेन तु विस्तृतां एकांगुलोत्सेधयुतां मखलोपरि सर्वतः कृत्वा लिंगत्रयकां स्तोकं कुर्याद्योनिं च सर्वतः
योनिः कारणं तु तस्य तत्वस्यास्य पदं महत् तेन तत्रैव व्याख्यानां निधाना तन्मयत्वतः कृत्वा निश्शल्यस्य

तंत्रराज

१८६

२८७

न्मांसैस्तवतवीक्षेडूभिः क्रूरेषु कर्मसु ॥ २७ ॥ स्नात्वैकमेकांतु फलान्वितथाक्रुनीत अन्नाज्यादिस
मस्तं तु निष्क्रमातं कनैतत्कमात् पर स्नातीविशुद्धवसनो धूपसुगंधवासितः प्रसन्नचित्तवदनः
कुर्याद्धोमं तत्साधकः । प्राक्तुखो विष्टरासीनः प्राणायाममुत्तरः सरं न्यस्तगात्रो धृतायेन प्रोक्षये त्कुंड
मध्यकं । द्रव्याण्येन्यानि तत्रस्थान्यशेषेण विशुद्धये दर्भेणविलिखेत्कुंड मध्ये रेखाचतुष्टयं प्राक्त
स्यदक्षिणे दक्ष तत्रजिह्वाः समर्चयेत प्रागादिषु तु सप्तापि मध्ये वह्निं तथास्मरन् । पूजयेत्तसर्षिषा

ज्ञार्णे

होमं कुर्यात्सक्रमेणवै जिह्वानामभिरेकैकं वह्नेश्च घड्राजादिकं । स्वाहांतमंत्रमुदित महानां क्र

१८६

मतः । शिवे वह्निं समाजनं हस्ते गृहीत्वांगारकं च तत् क्रव्यादेभ्य इति प्रोक्त्या स्वस्थानं तु समाजनं । नि

थं तदंगैस्तंविनाशयेत् ततस्तद्वक्रयोर्जिह्वाः सप्तकंसम्पगर्चयेत्। जुह्वयावसमाप्नोति वांछि
तंसकलंस्फुरणात् हिरण्याकनकारक्ताकृष्णाजिह्वायर्यर्थकाः दक्षवक्रगताः सर्वसिद्धिदाज्ञातु
रखनात् सुप्रभाभातिरक्ताच वक्ररूपाचवामगाः वक्ररूपारव्यजिह्वायां होमः सर्वार्थसाधकः इ
तरासुजुहुनेत्क्रूरकर्मस्वग्निमतेष्वत्तुः यस्यांजुहोतितामाद्यां सप्तस्वप्यर्चिषस्तसः ततोजुह्वेद्बजि
ह्वायासुरक्तायांतत्रकर्मणि सामान्यतोनित्यहोमद्रव्याणि शृणु सुंदरि आज्यमन्नंपायसंच ति
लतंदुलमप्यथ तथयंवेतिसंप्रोक्ता सुरक्तास्येतानिनित्यके कुशैर्दर्भैः परिस्तीर्य सर्वत्रैवतुकर्म
सु अभिचारेषुवाणैः स्यात् क्रूरेष्वन्येष्वपिप्रिये ८० नक्षत्रवृक्षैस्तद्वो निरस्तोस्यस्फुरणात्तथा त

तंत्रराज:

२९

होमं तु त्रिविधं प्रोक्तं स्थूलसूक्ष्मपरत्वतः। स्थूलं पञ्चोत्तरस्मिन्पटले सम्यगीरितं। इतरत्सविशेषं तु यानि
ज्ञेयानि तानि तु ओक्तानि सकलानीत्थं होमात्सर्वमवाप्नुयात्। विनाशयेदरं तीव्रं होमैः पापानि
चात्मनः नासाध्यमस्ति होमेन नानवाप्यमपीश्वरि॥ तस्माद्धोमेन सकलं साधयेत्सर्वदाञ्छितं

288

२०० विद्यातत्त्व।२०१ इति एकोनत्रिंशः पटलः। ।अथ षोडश नित्यानां सामान्यावास्तु देवताः ता
सां वक्ष्ये तत्र पूजाक्रमं सम्यग्वदामि ते।१ तत्फलानि च तद्धोमविधानानि तथा बलिं। सूक्ष्महोमविधा
नानि तत्फलानि परे तथा।२॥ क्रमेणाष्टप्रभेदे देवेशि ओक्तानि फलसिद्धये यैर्विना तु वने मंत्राः सर्वे स्यु

२८८

र्निःफलाद्भुतं चतुरस्राकृतिकाश्चिद स्युः सर्वतोद्भूत पुरा तस्य वर्णैः सैव सर्वे देवाः समुद्भवं

क्ष

परिस्नाप्य कुंडं तु तन्मध्ये विन्यसेत्ततः प्रज्वाल्य ललिताध्यानि विधानिः परिषेचनं कृत्वा दर्भैः परि
स्तीर्य पात्रासाद्य तत्पत्रकैः ८० तथाघृताहुतीः कृत्वा नित्याषोडश मूलतः जुहुयादेकमेकं तु ना
थनित्या स्वमूलतज्ञैः ८१ ततश्च परिधिं चाग्नि देव्या स्नानं विनामतं स्वाङ्गास्थानगतां कुर्यात् परिस्त
रणपूर्वकं ८२ दद्यात्पूर्णाहुतिं तस्मिन्नाकृत्वा तिलकं न्यस्तगात्रकः पूजां समाप्य विचरेत्सुखी तद्रूपता
नरः ८३ क्रूरकर्मासु होमेषु विधिरेष उदीरितः । तेषु तद्धोमकरणसमाप्तौ नित्यशास्त्रया ८४ सान्नं
गं विधिना स्नानं कुर्यात्तं पूजयेत्तथा । नित्यकर्म ततो नित्यं तत्तद्दिवसनित्यया ८५ । मिथुनानि च पंचाशत्स
जयेत्सम्पन्मेदवि । मंडले पूर्ववत्प्रदिते पादिमामित्युदीरयेत् ८६ एवं तेकाध्यते सर्वं कुंडादिषु समीरितं

द्वा

तंत्रराज
१८९
189

तथाहिहि तत्रोश्यां दिक्षु मध्यतः एकमेकं त्वेक्लिष्टं बहिर्विविंशादीरितं सर्वमध्येयजेत्समकब्
ह्माणंकमलासनं हेमाभंचचतुर्वक्रं वेदाध्ययनशालिनं प्रागादित इदिस्थादियजेदेतान् प्रदक्षिणंक्रा
र्यकंवविकस्वंतं भिन्नमन्म महीधरं काणोर्दकोष्टयोरेक मेकमष्टौवत तद्ययेत वन्यादीशांतमनि
तः पूजये त्सर्वविस्तिये १७ सावित्रः सवितारुक इदजिडुदतक्ताया। आपापवत्सकोवेति प्रोक्ता
स्तेष्टौतुनामतः १८ कोणोर्द्धकोणपार्श्वस्थे ध्वस्मादीशांतमर्चयेत अष्टोक्रमेणतारार्च्चे नमोंतै।
नमनिस्तथा १९ अन्यान पिञ्चकोस्मिन् प्रोस्कान सर्वास्य पार्श्वयेत् शार्वगुहंचार्यमणं जंभकंपिलि
पिच्छकं २० चरकोंचविदारींच पूतनांच महेश्वरि बहिरीशांदि परितोयजेदष्टौ दिशंप्रति। इशा

१८९

त्वा निहंतु मुद्युक्ता सैरेवधोनवेद्रात् आवयोस्तन्निरासाय मामेत्याकथयंस्तदा ५ कथयास्मा
कमधुना तदास्तु उरुषस्तु ॥ दर्पशांतिं चैतेन विश्वमाता ६१ह्युतं ६ इत्युक्तैर्मयाचोक्तं निधनं तस्य छः
शोकं खात्वात मवनीतस्य शरीरे स्यावयेत्तथा तिसर्वांश्चैवपंचाशत् तिसंदाक्रमणायवै । दिवीन्द्रस्ते
षां येष्ठ विमुखास्तै ः कृतानितु । सुकृतानि समादद्यु र्दुःकृतानि च कुर्वते तस्मात्तेषामर्चनं तु ५
सर्वं कुर्वतां सदा भु नान्येवातु जायंते नैवाभ्युनकथापिव नवचक्रादि विधातं तु स्थापनसम्यक् वी
मिते १० प्राक्प्रत्यग्दक्षिणोदक कृत्वा वेदक स्वचकं तैरीकाशीतिकोष्ठानि दिक्षुभागादि शुक मा
त ११ ततश्चतुर्षु कोणेषु तिर्यक्ष्व चतुष्कतः । द्विधा कुर्यात्कोणकोष्ठान्यष्टौ तत्सर्वर्द्धयोः पुनः कुर्या
एकौ

स्वनात् प्रत्येकं तैजने कुंडे चतुरस्रे दिङ्मुखैः व्रीहियुग्मयवैः क्रोडे घृतदुग्धप्लुतैः क्रमात् त्र्याष्टोत्तर
शतं वाष्टोत्तरं विंशति मेव वा। प्रत्येकं तैजने द्रव्ये मंत्रैस्तद्वत्पायसैः। बलिं च तेषां कुर्वीत पायसैर्भोजनादि
तैः सर्पिस्तैर्दधि कदली फलापूपादि संयुतं एवं सिंहगते भानौ दुर्लभायां प्रतिवत्सरं स्वगेहे वा स्वलक्ष्यायो मेड
लैशाज तत्कर्मं कुर्याद्दिवसे विप्रा नित्यामकान्यथावलां त्रयादशीनां विविधै र्मधुराद्यैश्च भोजयेत् तुक्तेभ्यो
दक्षिणां दद्यात् यथाशक्ति समच्चलान् एवं विदतो गेहे नाकस्मात् कदाचन न बालमरणं व्याधिर्भूतवेता
दिकानि च न सर्पपीडा नान्योन्यकलहादयस्तत्र नित्य पुत्रपौत्रधनारोग्यपशुदासीसमृद्धिनाक् अ
रोगी विजयी स्यात् तं चिरंजीवति तद्गृहे राजवेश्मसु सर्वत्र तथा च मदिषी गृहे सचिवामात्यसेनानी

नक्षाथ पर्जन्यो जयंतः शक्रभास्करौ सत्यो भृषांतरिक्षं च शर्वरीकोष्ठगाः क्रमात् । अग्निः पूषा
च वितथो यमो गृहक्षत रक्षकः गंधर्वो भृंगराजश्च मृगो दक्षिणकोष्ठकः निरृतिश्च तथा दौवारिकः
सुग्रीवकः स्तथा । वरुणः पुष्पदंतश्च असुरः शोषरक्तरोगकाः पश्चिमाशास्थाकोष्ठेषु ह्रज्ञारस्ते यथा
क्रमं । वायुर्नागस्तथा मुख्यः सोमो भल्लाटकस्तथा २५ अर्गलादितिरप्येव मदितिश्च यथाक्रमं । कोष्ठे
ष्वंतरसंस्थेषु देवतास्ताः समीरिताः द्वितीयवीथ्यां मध्यस्य चतुष्कं कोणस्थ तः रुद्रांश्च तुर्यतोऽथैव
भागादिषु तथा क्रमात् आग्नेयमार्गे पर्याय निरयाणि तानि लिखेत्क्रमात् भागादिषु तथादक्षे निसार्पै
रुद्रयार्तकं २८ पश्चिमे रूप्तिनो याम्ये वायुनकर्मांतिकं लिखेत् । उत्तरे रुजया माति विलिखेन्नैव यजे

त्रविधेति यत्त्रय्यां भूयते परं यज्ज्ञात्वा वनिता गर्भे न प्रयाति नरो ध्रुवं यद्ध्यायामास रहितं मनन्याविद्ध
निर्वहं यन्मनः क्लेशाविश्रांतेः स्थानं निःशेषकल्मषं सुखास्पदं स्वान्विश्वमयं विद्येयवेदनात्तु। अत्रो
स्कशेषमखिलं षड्विंशोपटले स्फुटं। प्रदर्शितं ततस्तत्र वर्णयामि च किंचन ५० नित्यानित्योदिते मूला
धारमध्येस्ति पावकः सर्वेषां प्राणिनां तद्वद्धृदये वज्राकरः ५१ प्रकृतिं ब्रह्मरंध्रं च ब्रह्मंद्रमाश्च ह्यवस्थि
तः तत्त्रयात्मकमेवस्मा दाद्या नित्या त्रिखंडकं ५२ तेषां त्रयाणामैक्यं तु मनसा भावयेत्तथा गमाग
मात्मांते जो अस्ति तेषां मन्योन्यजैः शिवे ५३ तथा समष्टिं तत्तेजस्त्रयं ब्रह्माथ तन्मयं विश्वं विकल्पविधु
रं भावयेदद्भुतं कृतं ५४ त्रयाणां वर्णानां प्रागुक्तानां क्रमेणवै वाग्भवमन्मथमंकृत्वा पुटितं प्रजया।

नवनेत्रुत्तरे तथा विदध्यात्स्वस्तिवर्णं तु श्रीरूपसिद्धे तु देशकः नवेत्रस्मान्यथारूपः फलैर्क्लेशोनिशांतवेत् वि
लाहाश्मतले यस्य तमेदस्तप्रमाणके। तत्र देवतनामानि मायागर्भेस मालिखेत् तवतान्पूजयेत्सम्यक् वेदि
मैकवासरं स्थापयेद्देशमस्तकापिनित्यांश श्वाथतवदे ४१ स्मरंस्तादेवतायुग्मा कुर्यात्पुष्पांजलिस्त्विसः
तद्देशमंडलग्राम उर खर्वटदादिषु विदध्याद्खिलक्लेशशांतैः समृद्धये ततः सूक्ष्मैपराख्येऽस्मिन् होमैः
सिद्धिं स्फटिकरिये ४२ स्वमूलाधारकैवकौ कुंडलिन्यग्रगामिनी वाच्यवाचकरूपेतु प्रपंचं तु जयात तथा ४४ येन।
वयोः समीदे विजायतेह वनेन वै तद्विधानं वदप्राज्ञशांतो सम्यक्ज्ञमाधुना ४५ आधारे वह्निसंस्थानं कुंडलिन्याः
स्थितिं तथा[illegible]तः तद्रूपं तत्क्रियां सर्वं वदस्वेविशदं प्रभो ४६ स्फटिकवद्ध्येविधानं ते सम्यग्विस्तरेणाधुना ज्ञानाग्निहो

तंत्रराजः
१०२
292

मूलाधारस्य वह्न्यात्मतेजोमध्ये व्यवस्थिता जीवशक्तिः कुंडलाख्या प्राणाकाराथ तैजसी ६४
प्रसुप्तभुजगाकारा त्रिरावर्ता महाद्युतिः मायाशीर्षा निदंती तामुखरंध्रं निशां स्वगे ६५ सुषुम्नाम
ध्यदेशे सा यदाकर्णद्वयस्य तु पिधायनश्यते लोसेतां ध्वनिं तस्य तदा मृतिः ६६ एवं सा जीवशक्तिस्तु
यदा कुंडलिनी स्थितिं विधाय ऋजुतां याति स्वेच्छादंडाहता सती ६७ तदा विश्वप्रतीतिः स्यात्साक्षालि
नामन्यदा पुनः निशांधकारे तु वनस्थितिवत्स्वात्मनः स्थितिः ६८ एवं तां वेत्ति यो देहे देशिकादेश
दर्शितं। स वेत्ति ब्रह्म परमं मोक्षमपि स साधकः ६९ जीवन्मुक्तः स विज्ञेयः शुद्धात्मा सक्तमानसः अ
स्पृष्टपुण्यपापश्च शोकहर्षादिनिर्मितः ७० रागद्वेषविनिर्मुक्तः स्मरत्न सर्वक्रियाफलः निरुपा

१०२

चतैः ष्टुटितात्मानुदहर्यैः स्वरांस्तारेणाङ्कंकतैः कुंडलीमुखमार्गाग्नौ जुहुयान्निश्चलात्मवः
वह्निनानुष्ठुटस्थेभ्यः नाडै स्तम्भ्य हुनेत्क्रमात् चंद्रनानुष्ठुटांतस्थैर्वक्त्रगैर्जुहुयात्तथा नानुचंद्रष्टु
टांतस्थैर्वक्त्रगैर्जुहुयात्तथा । चंद्रवह्निष्टुटांतस्थैर्नान्यगैर्जुहुयादपि वह्निचंद्रष्टुटांतस्थै रपि तद्व
हुनेद्धुतैः तथा तेषां प्रतिलोम्या षोडशानां क्रमेणापि एवं द्वादशाधारेषु मंत्रैः षाडदीरितैः कृत्वा
तद्धाम्नि मखिलमर्थरूपं वतैः समं ६० तेजस्वयात्मरूपं स्यादावयोर्दपितवत्तुः अन्यान्विवावयोरि
च्छागृहीतानिवरूं प्रिये ६१ तावत्स्वदेवतादेहसमानीच्छावशानि च मुक्तिश्च तन्मयी तावस्थैर्यमेव
समीरितं ६२ तत्र कुंडलिनी भूरि स्फुटं मे परमेश्वर तावदाभिष्टक्षेयाइं रहस्यं परमाकुतं ६२ ९८

प्रदाश्चतवदर्शिताः विधिविष्णुशिवात्मत्वं तासांमेव निजेच्छया अन्याश्च देवतायाया स्ताश्चात्मन्मयवि
ग्रहाः ८० परस्वरूपं तु वक्ष्यामि हो मंते महरक्तुतं । यत्सिद्धिः सिद्धरूपाणां प्रणतानां नवेत्सदा अन्येषां त
न्नवेज्ञाव्यस्तथा सर्वाश्रयो महान् प्रक्षीणाशेषपापानां भक्तिस्याच्च तत्सेविनां नित्याविद्याकुलज्ञानां
लक्षणं श्रृणु सुंदरि । आनुकूल्यकासंशयत्वं संतोषो नित्यपूर्णता सुखिता नित्याज्ञानं कृतज्ञत्वम
लुब्धता ॥ अकार्पण्यमदीनत्वं परचिंतानिरुद्यमः दयालुता मनस्वित्वमद्वैधम्यं मनः स्थितौ लज्ज
हीनो भीतिरोषाभावः कल्याणशीलता कल्याणोक्तिनिवेशित्वं सदाकल्याणकीर्तनं ॥ अकल्याण
कथालापवैमुख्यं त्वेकया स्थितिः सदैश्वर्यं विनोक्तुत्वं नैष्ठिकत्वमजिह्मता । सर्वानुकूल्यं संगीत

षिक संतुष्टः स्वेच्छाधीनेच्छयासुतः स्वदेहमात्रयात्रश्च समस्तुतिनिंदयोः समारिमित्रकल्याण

गुणशीलदयान्वितः एवंशाकधीतो जीवन्मुक्तो लोकेषु साधकः। इतरः सुजनेदेशा नजन्नेवस

कौतुकः कालेन सिद्धिनाम्नया दितरोऽः स्वनाजनं जन्मनिर्वर्ज्जितिः क्लिष्टो मूर्खो विद्याधनोज्झवेः

१४ मदेसन्मत्तविलसल्लक्ष्योध्येयाति योनिषु नित्यासुतन्नकिन्तुवने शक्रोऽपापकर्मणि १५ जायतेय

ह्वलाह्लोकेर्नवेश्यागुरुकलत्रणः नरीनवतितांन्तक्षिं शाप्यलोकेषु देवताः १६ हस्पंतेनानुवंशार बुधजी

वसितासिताः अन्येवलोकपालाद्या स्तन्तक्लिशास्त्रसंपदः ११ वज्जनाकिंपरंदेवि नित्यानिः सहशानघे नस्तं

तिदेवतानित्या स्तन्माताएवसर्वदा १८ नावयाम्यदमद्यापि त्रिकालेष्वियहान्वितः तद्वर्णना स्वकस्या

तंत्रराज १९४

194

निर्ऋतौ स्तम्भनं ततः आप्युदक् शिवदिग्वक्त्रः कुर्याद्धोमं तु मंगलं । दक्षिणास्यो निवारं तु गदेवह्निमुखो द्विषां
उच्चाटने वायुमुखो विद्वेषे रक्षसोन्मुखः विदध्यात्पश्चिमास्यस्तु क्रूराण्यन्यानि कृत्स्नशः स्वदेशाग्रा
मदाद्यादौ तानि कर्माणि तद्दिशि विदध्यादुपविश्य मन्यथानर्थमावहेत् ९८ कुंडादिकरणाशक्तो स्थं
डिले होममाचरेत् गोमयैः परिसृष्टे तु सुसमे न्यूतले शुभे ९९ वालुकाहस्तविस्तारायाममास्तीर्याम
मास्तीर्य तत्र वै मध्ये विदध्याद्धोमं तु प्रोक्तमेवमशेषतः १०० कालतत्व १०१ इति त्रिंशः पटलः स्व
दुर्मपरं च होमं ते कथितं परमेश्वरि । इदानीं स्थूलहोमं तु कथयाम्यरिमर्दनं १ तत्कर्मोदिते कुंडे कुर्या
द्धोममुदीरितैः विधाने द्वेषनिधनरोगानिग्रहोच्चाटने २ आयुर्दायं रिपोर्ज्ञात्वा लग्नो कृत्याद्रिपुणेपतः

१९४

विपक्षं वा ब्रितासयः ८७ राजयोगिस्तु आज्ञा बक्रमानममत्सरः सर्वेतिरत्ववांछाम्ब जङ्गलानीरि
तानिते। ८८ यद्विकल्पस्वरूपं तु मनस्थं निर्विकल्पके निक्षिप्तं परहोमं तु स्थूलसूक्ष्मं च मन्मयं
८९ ज्ञानवत्वै विकल्पाना वस्तूनामग्निदाहतः। तन्मयत्वादेकरूपं स्थूलहोममुदीरितं ९१ सूक्ष्म
होमं तथाचाध्ये नानारूपैस्तु वाचकैः। वाचार्थानामशेषेण वेद्यवेत्तृविदात्मनां। ९२ स्थितिः परोक्षवेद्यो
मः सर्वभेदविलापनात्। स्वात्मरूपमहावह्निज्वालारूपेषु सर्वदा। ९३ निरंधनेद्धरूपेषु परमार्थात्मा
निस्थिरे। निर्भुत्यानविलापस्तु परहोमः समीरितः ९४ तेष्वन्येषु च कुंडेषु चतुरस्रेष्व समाचरेत् होमकर्मसम
स्तं तु स्थूलात्मकमुदीरितं ९५ सूक्ष्मात्मकमुक्तं तु कुर्यात् स्वेसमीरिते। अन्येषामानि कार्याणि ज्ञेयाः

तंत्रराजः यद्दमंडलैः देहीकुण्डलिनां तद्दशांगुलविनिर्दतः मद्ग्धिस्विरणं तु तान्दशदशास्तनदयेत् तयाणांम

१९५ तुगुल्येन कुर्यात्कर्माणि नान्यथा स्तनाग्रस्तानि सर्वाणि फलंति चक्रतेभुवं। तथा हनिर्विस्थानानस्य म ९+

त स्थानकानि च। ज्ञात्वा विदध्यात्सुतत्वाः प्रयोगं सर्वैस्तथा। स्थिते हृदिस्तनगलेना साङ्किणि तथा स्फुतौ।

295 शूद्रांखमहृदमध्येषु तत्र शंखस्तु मध्यतः १५ कलेनिद्रे नासिकाया वर्त्ततेकुरुपस्यतु सकर्कन्दैस्तनतटे स्

दिनास्तौचतुष्के। १६ जानुसंध्यंघ्रिपार्श्वेषु तथांगुष्ठेच दक्षिणे। अंघ्रौसंध्यौजानुगुह्ये नाभौचेतिसितेतरे। १७

तिष्ठेद्विषकलागुंसि स्त्रीयोवामादिवर्त्तते विषं नाड्यां विषस्थाने वेधयेत्कंटकेनतु। १८ संकोचकारणेनत्त १९५

था तीव्रेणास्थिमयेनवै। वकुलादिसत्त्वस्थैर्वा तत्स्थायः सारस्तुविधिः १९ उत्तमायकतलादिद् तदंगश्च।

तात्कालिकग्रहाणां च स्थितिमष्टकवर्गकं। त्रयाणामानुगुण्येन कुर्यात्तदनिवारकं अन्यथा क्रूरकर्मा-
णि कुर्वाणं नाशयंति हि ४ तान्येव कर्माणि ततस्तु त्रयस्यातिकूलतः कुर्यात्तद्देवतान्नत्क्ति मात्रिकं च
र्तितं गुरुः तेनाथर्ववित्रिमं च ज्ञानालोच्य रिपुनिग्रहं विदध्यादन्यथा शस्त्रा नैः फलं वात्मनाशनं। रिपोरष्ट
मलग्नेव कालेत्वष्टमराशिगे। स्थाने कुर्याद निष्टानि तद्विनाशाय साधकः प्राच्यां मेषवृषौ च स्तौ मिथु
नं दक्षिणे तथा कुलीरसिंहौ च यत्तान्नैर्ऋत्यां कन्यका स्थिता ८ तुलाकीटौ पश्चिमतो धनुर्वायौ तु संस्थि
तं। नक्रकुंभावुत्तरतो मीनमीशे तु संस्थितं ९ एवं राशिक्रमं ज्ञात्वा कुर्यात्कर्माणि देशतः कालेतु पंच
पंचसु घटिकाक्रमयोगतः १० चैत्रादिषु तु मासेषु द्वादशस्वपि नात्क्रमात् मेषादिराशिगो याति तथान्ये

तंत्रराज: १०६

क्ष्यके: वैरिदेहजरोमाद्ये रूपैतैः पुत्तलीकियाम् १८ पुत्तलीं देयमानं तु कृत्वाष्टांशा मयैकतः शीर्षत्रयात्क
टे रूर्ध्वं त्रयात्स्यात्तद्द्वयं तथा २० कटिप्रपदयोरेक मंशमेवं तु पुत्तलिं विधाय तत्र सर्वत्र प्रयोगानाचरेत्ततः
२१ पातालयोगे नीचारम्भे विषयोगे च मृत्युजे नाशयोगे च दिनज्वरस्पौकक वयोगके वडी रुचंडा युधके। कु
र्यात्स्वयोगान् प्रसर्पिन्तं गायनिधनाय वा। निग्रहाय निरीक्षैवं कुर्यात्सिद्धिमवाप्नुयात्। वश्याकर्षण विद्वेष

१९६

स्तंभनतीच्चाटमारणे विदध्यात्पुत्तलीसम्यक् तस्याः प्रीत्यर्थयोगतः पिष्टेत सिक्थेन तथा चाकि हस्तप्रदापि
च साध्यनक्षत्रवृक्षेण पुत्तल लक्षणसंयुता: २६ आसने पादयोः स्थाने कुंडमध्ये च साधकः। पिष्ट
मृतरुजाः खालाः स्थापयन्ति सिक्थमंबरे २७ कुंडमध्याउपर्यूर्ध्व पदांत्यक शीर्षिकामपि। एवं साधारणं

१०६

त्रुदेहजं व्याधिना पीडितं कालात् दर्वियेयन्न वेधुवं २० तत्र जेनार्तिनास्ति हो जीवितेन्द्रा पुरं व्रजेत् पुत्तलीकर
णं वक्ष्ये शत्रुणां निग्रहसिद्धये २१ सौम्यास्त्रकुबुधाश्चंडी भास्करः सौम्यनागवी मंगलो गुरुमंदर्केतु स्वोंशाकरा
पाः २२
शिकाः नक्षत्रा लिवतुष्पाद अन्येव मष्टोतरं शतं एतावत्सख्य पुत्तल्य स्वं शाकक्रमयोगतः प्रथमेन वर्केचंद्रभा
स्कराशांकयोः क्रमात् षोडशाद्वादशात्या मानमंगुलि संख्यया। अन्यांशकेषु सर्वाष्ठ चतुर्दशसमीरिताः द्वि
तीयेतव वर्केन्येषां मध्यर्द्धसुत्रयोदश तृतीयेनवर्केन्येषां त्रयोदशसमीरितं चंद्रार्कयोरेकविधः प्रोक्तसंख्या
क्रमस्तथा पुत्तलीकरसोद्भवं वक्रियद्रस्तद्दानितं चिताहरकस्मलवलोक्षुंवी पिप्पलिकायुतं मरीचहह २९
धूमं च लशुनं हिंगुसैंधवं सौरिकं चेति कथितं पुत्तलीजन्म मीन्द्यरि साध्यर्क्षहृदेः विष्टेष्ठुमाषरै क्षसि

कैर्जनेत् तत्सत्वांबुहुतैर्मासादरातिर्नीतिमाप्नुयात् आरग्वधसमीद्भिर्नौ तत्समिकिश्वैस्तूकलैः वित
सिमात्रैस्तैलाक्तैर्हवनाद्वैरिणोभृतिः आरुष्करसमिद्भिर्नौ तद्बीजेस्तहुतैः। हीमादरातेस्ती
व्रार्ति ज्वरेणस्यान्मृतिर्ध्रुवं। सौवीराक्तैस्तुकार्पासबीजैर्हुतैर्मातृमंडलात् अरातीनामथान्योन्यं
कलहान्निधनंभवेत्। सर्षपाज्यहुतैः शृंगी माणध्रीमस्त्वैर्जनेत् वैरिजन्मर्क्षरक्षाग्नौ मंडलात्तन्मृ
तिर्ज्वरात् ५० आतुल्यैः उत्तविःकला डमैरुक्तविधानतः सर्षपारुष्करघृतसंसिक्तैर्जुहुयान्निशि
५१ आग्वधिसिवातदंगैस्त कुन्दविन्नीकरणोंबरः रक्तस्रगांधपुष्पादियुतः शत्रून्विनाशयेत्। अरुष्क
रघृताभ्यक्तैस्तद्बीजैः सर्पशीर्षकैः हवनाद्वैरिणोदाह ज्वरजाशिस्विलिद्दिनैः वैरीनक्तवयोतु

कृत्वा कुर्यात्कर्मसमीरितं सर्वशीर्षस्तु वा होमं कुर्यादशुभकर्मसु वैरियो न्मस्त्रजा कृत्वा-वरं तु जु
हुयात्तथा त्रिकीलकं नैयमादिजनुन्हत्वा ईरात्रकि श्मशाने निर्जने देशे विदध्याद भिचारकं ४० यत्रा
भिचारहोमं तु करोतु तु विसाधकेः तत्रा मितो नृपो रक्षां कारयेदात्मसिद्धये ४१ नवेदराज्ञि नृपतिश्चा
रैरज्ञातानि हत्स तु स्व राष्ट्र संक्षोभे कुर्वीत न कुर्वीत स्वमंडले ४२ यदि कुर्यात्स्वमादेन मांत्रिको ज्ञानमोहतः
~~संक्षोभे कुर्वीत न कुर्वीत स्वमंडले ४२ यदि कुर्यात्स्वमा~~ तदा राष्ट्रं पीडयंत्येव ज्ञानकैर्वैरिनृन्हतः अहदु
मसमिद्भिर्मो तस्कलैश्च करंजजै हैमीदल रसाक्तैस्तु मोहाम्लवृन्तिर्वीज्यायेत ।। नक्तमालसमिद्भिर्मो
तस्कलैर्वा तथा कुनेत रिपुरुग्ली पिरोगार्त्तः प्रयाति यमसादनं । उन्मत्तकाष्ठैः पञ्चात्मवकालतः बीज

तंत्रराज
१९८

केशार्बि अद्दरेखशनैः शनैः ६२ व्यरातेस्तत्तदंगैः स्या लिधनं अद्दरादिना यंथिन्निर्वाकंटकादिकृतदृढवि
दारणैः तत्कृतौ लक्षवृक्षौ त्य उत्तलिंस्या पितेरकं गर्दनीमदे सलिले संस्थाप्य स्थापयेच्छनैः रिपुर्दाहज्व
रग्रस्तः शनैर्याति ममालयं मध्यच्छिष्टेन तां कृत्वा तापयेल्लिखितां शनैः तेनोन्मादज्वरग्रस्तः मयाति नि
धनं शनैः तां तत्कंटकविद्धांगीं खनेत्सित त्वग्दहे निशि ब्रणो सिराव्याविष्टस्य रिपुर्याति ममालयं अथुत्के
रेवतद्भे रजोवैः उत्तलितया निर्मायकुंडमध्ये तां ख्वालारातिमहीरुहेः समिद्धेग्नौ तत्सामिद्धिस्ते ला
क्षैर्जुऊयाल्लिखिः सन्निपातज्वरग्रस्तो वक्रजिह्वोतिमूढधीः अलपंस्तन कैर्देहं स जन्याति यमाल
यं तथा विधं तां एतिमानि खनेत्कृलवृक्षके नवमं गारदिवसे मात्रगेहे पीठके ७० सप्ताहात्निध

१९८

198

त्य मांसैस्तद्रक्तसंयुतैः हवनात्तत्क्षणात् समिधां हवनादपि दिनैकेनैव रिपुः क्लिष्टो नाशमेति सुनि
श्चितं । द्रुमकुड्यनिपातेन निर्घातेनापि खड्गतः सलिलेपावके सर्प दंष्ट्रान्मत्तद्विपाज्ज्वरात् यक्षराक्ष
सगांधर्व पिशाचब्रह्मराक्षसैः अन्यैर्वा कारणैः क्लिष्टो नाशमेति रिपुर्ध्रुवं निंबपत्रैश्च कार्पास बीजैस्त
थैव करंजजैः हवनात्सर्षपस्नेहसिक्तैर्विद्वेषणं भवेत् नीचयोगेन जनेद्यो रिपुर्हन्तुं समेधते तद्वद्रवं
डेस्थैलाक्षे निशामध्ये रिपुर्दिनैः उच्चाटितः प्रयात्येव मंत्रशास्त्रानिता इतः प्रसूपत्रैश्च तत्कांडे स्वीबी
जैस्तथा चूर्णीकृत्य नेत्र अरातेर्दृष्टिनीवारः रोगैर्नश्यति निश्चितं ६० गैरिकैर्गुग्गुलीकृत्वा रिपोर्दश मरा
त्रिकैः प्रांशुकंटकाद्यैस्तु यदंगे वेधयेच्छनैः ६१ विषनाड्यां विषस्थाने । तथाश्वयमकंटके अर्द्धप्रहर

तंत्रराज

१९९

299

कलंबयेत् तुजया तत्समिद्भिस्तु तत्क्षीराक्तैर्निशांतरं ७९ ज्वरार्तः स्यादरातिस्तु त्रिभिरेवादिनैस्त
तः ५७ पश्यति तस्य रक्तेन तां तटाकोदरे खनेत् ८० जंबालमध्ये तेनास्मात्सौख्यं तस्य शनैः शनैः त
थायदिनं कुर्वीत चिरं रोगात्प्रमोचयेत् ८१ तथा तामामकांडे तु निवेश्यांगारवासरे चंडिकायतने खा
त्वा तद्योनिं तस्य रोबलिं ८२ निहत्य दत्वा रातिं तु निद्रया ऽपसर्गकैः स्वगेहे तु स्थाः खात्वा तदुपर्यग्नि
ज्वालनात् ८३ अविलंबमरातेः स्याज्ज्वरादिगदसंभवः तां तथाकृतरूपां तु रुरुजंघादस्तिसंयुतां

रा. ८४ निबध्य पूर्वसूत्रेण द्विषद्गेहे खनेन्निशि रात्रौ तदष्टमे मासात्स्वयात् सुच्चाटितोन्यतः ८५ तथा विधि १९९
उत्तलिका युगं रुत्वोस्रमार्गतः विडालमूषिकाचर्म नद्धं सा आरुद्याप्युतं । ८६ विखनेत्तीरयोर्नद्याः

नं वैरि प्रयाति निशि ताडितः कृताङ्घ्रिः शिरसि स्वीये निर्यान्ति वदन्ति कृतं ७१ सर्षपं माषचूर्णं च तिलं शालि
जतण्डुलं पिष्ट्वा साध्यकं हरिद्रसम्भाकल्केरपि संयुतं ७२ एरण्डबीजे मिलितं कृत्वा पुत्तलिकां ततः तद्गो
तनिर्गतया [illegible] नामतालस्य पत्रगं ७३ संजप्य तां स्थराग्निद्यां तार्तीयप्रतिलोमजां सहस्रवारं साध्यस्य
वधर्द्दे ष्टमराशिगे ७४ निवध्य तां पादयोस्तु नातु हृदुजतन्तुना गृहीत्वा जीवहस्तेन तां जपेत्स्य यजेत्सुधी
७५ कृत्वाम्नौ तैः सहस्रं तु ताम्रध्वं च भ्रिमवाज्जुखी तद्दिने तापतप्तार्त्ति विकलेन ज्वरेण सः ७६ अहदे
हो लुठन्नूनो विसंज्ञः प्रलपन्मुहुः प्रयाति निधनं शर्ल प्रयोगबलतः शिवे ७७ साध्यकं हरूसंहृतां
पुत्तलीमर्कडग्धतः वल्मीकौ रेणुचालिप्तां वद्धांजाग्व दक्षोमुखी ७८ साध्यनामादि संयुक्तां कुंडाद्ध्वं

तैर्मार्त्यकैस्तस्य सर्वं विद्वेषं कारयेत्ततः ९५ तैर्द्विष्टे निधनं तस्य सुरा कंसादनाश्नयात् । नाग्पादिकं महार
ण्या करस्मांत्रिकसंगतं ९६ राजानं राजपात्रं वा कथं हन्यात्प्रयोगतः तन्मे कथय देवेश यदुपायं तु वि
ते द्यते वदामि ते श्टणु प्राज्ञे त्वमोघं घोरविग्रहं अभिचारमरातीनां मान्तुनाशकरं परं सिद्धमंत्रानति
स्निग्धान् षोडशाति स्थिरासयान् तैरविच्छिन्नरूपेण होमयेद्याममण्डिक्रमात् । तेन ते निधनं कुर्यादु
क्तितस्माद्यत्नतः अरातिनिग्रहं कुर्याद् देवमुख्यविधानतः १०० मायातत्व १०१ इति एकत्रिंशः
पटलः अथ होमं प्रवक्ष्यामि ललिताविद्यया शिवे १ येन मर्त्यो त्रिभुवने भवतो देवतासमः १
तद्विधानं श्टणु प्राज्ञे ज्वमकालादि नेदतः प्रोक्तेषु नवकुण्डेषु तत्र तत्कर्म सुचोदितैः २ कुण्डयादुक्रमार्गे

पितृगेहे यदा ततः मातृगेहे नदीस्त्र्यां विदेशः स्याद्द्वयोस्तदा तानवशाग्वउसाद्य साध्यारव्यादिसमन्विताः
तद्विद्याजापसिद्धास्ताः खनेदरिगृहे उत्तः मध्ये दिक्षु तु तथा तत्कुलोत्सादनं भवेत् एवं निकटवर्त्तीनां
मन्त्रिवारणदीरितः ८९ दूरस्थितानां द्विषतां कथं स्याद्दन्निवारकं वदामि तेऽष्टक्ले श्रृणु दूरस्थस्य वैरि
णः ९० विनाशने प्रयोगं तु द्विजमर्थन्निवारकं येनारिर्निकटस्थात्तु प्रागेव निधनं व्रजेत् तत्साध्यरूपैः
पुत्तलिका विधाय प्रोक्ततं क्रमात् ताः प्रागुदीरितस्फीर द्व्यसिक्तास्संज्ञकाः ९२ तत्तद्देशकमाना
१ घनास्ता मध्यरात्रतः एकान्ते कोऽज्ञते द्वैरि विद्धुरवस्ताच्छोषतः ९३ तत्तद्देशककालेवा सुदूरस्थो
पिनाशनाय कथं वामांत्रिकबलि निहन्तुशक्यतां व्रजेत् ९४ तं प्रश्रष्टके त्वां शिवे वाक्ति प्रकारं तस्य निग्रहे

तंत्रराज
२०१
201

ज्यास्तिते: घृताक्तैरब्दमात्रेण निःसपत्नां लक्ष्मीं श्रियं। तथैव दिवसे घृतो गुडैः हुतैर्जनेत् कीर्ति
लक्ष्मीजयारोग्य हुतो जीवति स्तले द्राक्षाभिर्गुर्धसि क्षाति स्त द्दिनैर्हवनात्ततः क्षीराहारी चिरंजीवो
जीवत्यकलुषाशयः खर्जूरीफलहोमेन त्रिमध्वक्तैश्च तद्दिनैः आयुरारोग्यविजयसंपल्लाश्रियम
श्नुते कदलीफलहोमेन तथा तद्दिवसेषु उत्पकीर्तिनृपैर्मान्यो जीवेद्वर्षशतं सुखी नारिकेलफ
लक्लोदैः सितक्षौद्रसमन्वितैः हवनात्तद्दिने इष्टमखिलं समवाप्नुयात् १६ तैरिक्षुवारिसंसिक्तैर्हु
वनात्तद्दिनेष्वेवं वासांसि नानावर्णानि महार्हाणि लभेत्तथा १७ षड्भिश्चतेस्त्रिमध्वक्तैर्हवनाच्छ्रियमाप्नुया
त् तैः सवत्ससितागमपयोक्तैर्हवनादपि १८ महिषीक्षीरसंसिक्तैर्होमादिष्टमवाप्नुयात् अजाक्षीरप्लुते

२०१

ए तत्राभिधानपूर्वकं शुक्लप्रतिपदारंभात्सूर्णतं पैंकजैर्जनेत्र मधुरत्रयसंसिक्तैः पुष्पैरप्यसू
णैः शुभ्रैः अखंडितैरब्द मात्रान्नरो नृपतिसंनिभः तेष्वेव दिवसेषु प्रज्ञैः सितैस्तद्ववनाहुतैः कल्हारै
र्हवनात्तेषु दिनेषु धनधान्यवान् ५ तेष्वेवोत्सलहोमेन श्रियमाप्नोति पुष्कलं अरुणैरुत्पलैर्होमात्क
न्यकां सुमवाप्नुयात् ६ कैरवैर्हवनात्तेषु दिनेषु श्रियमाप्नुयात् सौभाग्यं कीर्त्तिमारोग्यं वाम्नो सर्व
नादपि तैः पङ्कैः कुंकुमक्षोदसुरैस्तद्दिनहोमतः। अचलां च श्रियं प्राप्य सुखी जीवति भूतले।
तैश्चंदनाक्तैर्हवनात् दिनेषु यथाविधि पुत्रदासीदासयुतश्चिरंजीवति मानवः। तैरेवोद्ववाक्तैस्तु
होमात्कंदर्पसंनिभः वनिताजनैः सह नरो दीर्घायुर्वै जीवति १० कृष्णप्रतिपदारंभादर्शांतं तु

लेत्रराप

२०२

२०२

वारे तैलसिक्ते । तिलैः शुद्धैस्तथेतरैः हवनात्तनतैलक्ष्मी मक्षादतिमनोहरां २८ तैः समस्तैः
समस्ता स्कैजुजयास्तनस्तुक्रमात । तद्दिने रिंदिराद्युः स्नाद्दियाद्ववनवैनवात २९ तत्तादिनेष्वत
द्विद्या नस्कांस्तीनवौसुजोजयेत घृतक्षीरसितक्षीद्रगुडाद्युपसमन्वितं ३० अश्विन्यादिषु कृत्तेषु
नवस्वपि कुनेत्क्रमात शालीनि स्तंडुलैर्भुंजे सर्षपैगौरेतरैस्तिलैः ३१ तथाविधैः सर्षपैश्च कोद्रवै
रिंदिराप्तये । कोद्रसर्पिस्तैलदुग्धदधिक्षीरसाप्लुतैः महिष्यजाविकाक्षीर प्लुतैस्तैर्नवसुक्रमात
मयादिषु तथा होमं नवभिः सालवस्त्वपि । वणकैश्चचणकान्नैश्च मुद्गान्नैः कुलारैस्तथा माषान्नै
श्च हरिद्रान्नैः पायसैरपि २४ मुद्गान्नैश्च त्रिमध्वक्तैः कीर्तिलक्ष्मीजयाप्तये तथाम्लादिनवके नव
गुडान्नैः

२०२

स्तैश्च तथा विद्धीरसंयुतैः नारिकेलफलक्षोदक्षीराज्यैरपि तैर्जुतैः तथा द्वादशभिर्दर्भैरेकैकैः सहितैस्तु
वा २० नित्यशो हवनाद्दुग्धक्षौद्रसर्पिः समन्वितैः गोत्रीहिरण्यवासोभिः समृद्धो जीवति स्थितो २१ रविवा
रे सिताब्जैस्तु क्षीराज्यैर्जुहुयात्तथा अब्जादलसहस्रैः स्याद्धृताज्यैर्वा मधुयुतैः सोमवारे सितेवेतै। ना
रिकेलफलैर्जुतैः सपत्नसस्यां पृथिवीमवाप्नोति स्तु निश्चितं अंगारवारे क्षौद्राज्यै रक्तैर्होमाच्छ्रियं ल
भेत। तैरिक्षुखण्डमिलितैर्हवनात्तां महीं लभेत् बुधवारे घृताज्यैस्तु होमेन तिलतण्डुलैः श्रियं सकलक
ल्याणं नित्यं लभते ध्रुवं गुरुवारे दुग्धसिक्तपनसास्थिपरागकैः जुहुयादब्दमात्रेण लभते गेहस्तु
त्तमं॥ सितवारे नारिकेलक्षोदैः सितसमन्वितैः॥ गुडान्वितैर्वा जुहुयाच्छ्रियास्तु चिरमेधते २७ शनि

ऊ=

कुले मासेषु जन्मवितयी होमं कुर्याद्यथाविधि दूर्वाघृताक्तैस्तिलैर्नित्यं यावज्जीवं सुखी भवेत् तद्दि
नेषु जपेद्विद्यां सहस्रं दिननित्यया न तस्य कुत्रचित्कश्चित् कश्चित्कदाचित्क्लेशसंभवः तर्पणं कार
येच्चंद्र वासितैर्मधुरैर्जलैः सौरजाद्यैः प्रसूनैश्च पूजयेद्वा घृतादिने अवंध्यजन्मवितयः स्यात्कदाच
न मांत्रिकः यदि स्यात्तस्य रोगादि पीडा भवति निश्चितं जन्मस्थे वा स्वराशौ वा स्थिते चंद्रे दिवाकरे विद्यां
जपेत्सहस्रं वा शतं वा पूजयेच्छिवां यस्तस्य रोगलीबाधा कदापि न भवेद्ध्रुवं तस्माडक्तेषु कालेषु त
था कुर्वन्सुखी भवेत् यद्रोगादि दारिद्र्य क्लेशायुक्तस्य मंत्रिणः मांत्रिकत्वं भवेल्लोके सो कदाऽस्य

दं भवेत ५० पलाशपुष्पैश्च फलैः पत्रैः कांडैश्च मूलकैः हवनाद्वत्सरमात्रेण वाग्मी स्यात्कुंडवागपि ५१

निजुक्यातथा ३८ शुक्रे सक्तुतिलाजै रिक्षुकांडैः पयः घृतैः शालीयवणकङ्गोत्थै मधुविहृतिलाज्य
वैः अपूपैर्मधुरान्नैश्च विजयं कीर्तिमिंदिरां। आरोग्यमायुः सौभाग्यं मान्यतां वल्लभेषु वं सिद्धयोगेषु
यज्ञैर्जुह्वया सत्सम्पद्दिमान्। तथामृतारव्ययोगेषु जुह्वयाद्रोगशांतये। गुडूचीतिलदूर्वाभि क्षीर
धात्र्यादिदलात् अश्वयोगेषु जुह्वया दस्तकौलस्थलैः घृतैः ३९ अक्षो भवति सर्वेषां सकुलानां सुनिश्चि
तं पर्वतारव्ये जन्मयोगे यज्ञैस्तद्विपर्वतं ४० नवेदस्मात्सिरेणैव कालेन परमेश्वरि अथान्यमद्भुतं
होम माकर्णयवदामिते ४१ स्वदेवर्गस्थे स्वर्गे वाजुह्वया न्रुपतत्तये। पायसैर्घृतसंसिक्तैः सित
मिश्रैस्तु विधया ४२ सर्वदायोक्तविधि मेनं कुर्याद्यथाविधि तत्स्योरकेषु कालेषु षट्हात्रिंसालस्

तंत्रराज

२०४

204

